# ॥ अथ वैराग्यस्तोत्रम् ॥

भज भुवनेशीं स्मर भुवनेशीं नम भुवनेशीं मन्दमते ।
यमभटशासनभूरिविलोडनरक्षणकरणे कोऽपि न ते ॥ १ ॥

भज भुवनेशीं स्मर भुवनेशीं नम भुवनेशीं मन्दमते ।

गृहिणी भगिनी दुहिता सोदरमित्रकुलादि द्रव्यकृते ।
तव नहि कोऽपि त्रिणयनदयिता-चरणसरोजध्यानमृते ॥ २ ॥

भज भुवनेशीं स्मर भुवनेशीं नम भुवनेशीं मन्दमते ।

जन्मगृहीत्वा यदिह विधेयं तदगणयित्वा किन्तु कृतम् ।
दुरितकुलाचलपक्षवियोजनपुण्यजनायुतमुन्नमितम् ॥ ३ ॥

भज भुवनेशीं स्मर भुवनेशीं नम भुवनेशीं मन्दमते ।

द्रविणं कस्य प्रीणनहेतुर्निखिलो लोको न हि यत्र सः ।
साक्षाद्दयिता संक्षयहेतुः पृष्ठे कस्माद्व्रजसि तया स्वम् ॥ ४ ॥

भज भुवनेशीं स्मर भुवनेशीं नम भुवनेशीं मन्दमते ।

भूरिविचारितममलं शास्त्रं लब्धः किं तेऽप्यर्धकपर्दः ।
श्रमयसि धिषणां मूढ किमर्थं भज भुवनेशीं त्यज भवरोगम् ॥ ५ ॥

भज भुवनेशीं स्मर भुवनेशीं नम भुवनेशीं मन्दमते ।

काषायाम्बरपरिवृतवेषो दण्डी कुण्डी लुञ्चितकेशः ।
प्रवदसि तत्त्वं हृदि परमहिला व्रतिनः केयं तव दुर्लीला ॥ ६ ॥

भज भुवनेशीं स्मर भुवनेशीं नम भुवनेशीं मन्दमते ।

दृश्यं द्रष्टा दर्शनसाधनमेतस्त्रितयं यस्य तु विषयः ।
ज्ञेयः साक्षी तत्त्रयरहितो द्रष्टुदृष्टेर्नहि परलोकः ॥ ७ ॥

भज भुवनेशीं स्मर भुवनेशीं नम भुवनेशीं मन्दमते ।

संसारानलभर्जितदेहः कथमपि शान्तिं न हि चेद्व्रजसि ।

अतिशयशीतलपुण्यहिमाचलसम्भववल्लीं श्रय देवीम् ॥ ८ ॥

भज भुवनेशीं स्मर भुवनेशीं नम भुवनेशीं मन्दमते ।

अन्तर्यामी तव सुखकारी नोचेदन्यः कः सुखकारी ।
सर्वत्रायं यः प्रेरयिता सोऽयं तस्मान्नहि तारयिता ॥ ९ ॥

भज भुवनेशीं स्मर भुवनेशीं नम भुवनेशीं मन्दमते ।

मृतमपि सुकृतं किं फलदं स्याद्यदि न त्रात्री भुवनाधीशा ।
कृतमप्यकृतं किं फलदं स्याद्यदि सा गोप्त्री भुवनाधीशा ॥ १० ॥

भज भुवनेशीं स्मर भुवनेशीं नम भुवनेशीं मन्दमते ।

कुरु निजकर्म त्यज दुर्व्यसनं व्यसनी भव रे परमेश्वर्याम् ।
भवतु जनोऽस्मिंस्तव शुभवक्ता भवतु स एवाप्यशुभविवादी ॥ ११ ॥

भज भुवनेशीं स्मर भुवनेशीं नम भुवनेशीं मन्दमते ।

सकलं गुह्यं तिष्ठतु तावत् किं तैर्गुह्यैर्गुह्यसमानैः ।

गुह्यं सत्यं यत्तु तदेव श्रीहरमहिळाचरणसरोजम् ॥ १२ ॥

कोऽयं लोकः कं सम्सारः केयं लीला विषयविलोला ।

जन्मनि जन्मनि मग्न इहत्वं स्मरसि कदा तां भुवनाधीशाम् ॥ १३ ॥

भज भुवनेशीं स्मर भुवनेशीं नम भुवनेशीं मन्दमते ।

वृद्धो जातो जरया तप्तः कफयुतलालाघर्घरकण्ठः ।

पश्यसि किं रे कस्य कुटुम्बं संश्रय भुवनाविनतनितम्बम् ॥ १४ ॥

भज भुवनेशीं स्मर भुवनेशीं नम भुवनेशीं मन्दमते ।

भज भुवनेशीं स्मर भुवनेशीं नम भुवनेशीं मन्दमते ॥

॥ इति वैराग्यस्तोत्रम् ॥

- Sri Kamakoti Mandali